# संस्कृत-वार्ता:

## दिनाङ्कः-24.10.2025 सायम् - 06:20

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोच्यते यत् जीविका-मेलकानि युव-जनानां स्वप्नसिद्धेः माध्यमानि सन्ति जाताानि, श्रीमोदी नव-दिल्ल्याम् आयोजितं सप्तदश-राष्ट्रिय-जीविका-मेलकं समबोधयत्।
- बिहार-विधानसभा-निर्वाचनस्य प्रथमचरणस्य प्रचारः तीव्रीभूतः, प्रधानमन्त्री श्रीनरेन्द्रमोदी समस्तीपुरे सम्बोधितवान् जनसभाम्।
- वित्तमन्त्री निर्मला सीतारामन् उक्तवती यत् — जी.एस्.टी. इति वस्तु-सेवा-कर-व्यवस्था अधिक-प्रभावशालिनी, न्यायोचिता, विकासाभिमुखी च करिष्यते, एतदर्थं त्रिदिवसीय-अनुमोदन-प्रक्रिया नवम्बर-प्रथमायाम् आरप्स्यते।
- आन्ध्रप्रदेशे कर्नूल-जनपदे दुरापन्नायां बस-दुर्घटनायां विंशति-जनाः मृतिङ्गता: नैके चक्रणिता सूच्यन्ते।
- भारतेन एशिया-महाद्विपीय-युव-क्रीडान्तर्गतं बहरीन-देशे समायोजितायां कबड्डी-प्रतियोगायां विजितं सुवर्णपदक-द्वयम् ।

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री — राष्ट्रियजीविकामेलकम्।**

प्रधानमन्त्री श्रीनरेन्द्र मोदी न्यगदत् यत् जीविका-मेलकानि देशस्य युवकानां स्वप्नानां साकारीकरणस्य सशक्त-माध्यमानि सन्ति जातानि। प्रधानमन्त्री एतत् सर्वं नव-दिल्ल्याम् आयोजितस्य सप्तदश-राष्ट्रिय-जीविका-मेलकस्य अवसरे प्रसारिते वीडियो-सन्देशे प्रत्यपादयत्। एतस्मिन् अवसरे विभिन्न-सर्वकारीय-विभागेषु संघटनेषु च नव-नियुक्तेभ्य: एक-पञ्चाशत्-सहस्राधिकेभ्य: युवकेभ्य: नियुक्ति-पत्राणि अपि वितरितानि। अस्मिन् अवसरे प्रधानमन्त्री किम् अवोचत् शृण्वन्तु तावत्—

"जीविका-मेलकानि अद्य युवजनानां स्वप्न-सम्पूर्तेः माध्यमा: जाता: सन्ति। "स्टील इंडिया मिशन" सन्निभा: उपक्रमा: युवजनेभ्य: नूतन-कौशल-प्रशिक्षणं प्रयच्छन्ति, तत्रैव नेशनल करियर सर्विस प्लेटफॉर्म सदृशा: पोर्टल-मञ्चा: तान् युवकान् नूतन-सम्भावनाभि: साकं संयोजयन्ति। अस्माकं लक्ष्यमस्ति यत् प्रत्येकमपि युवजनेभ्य: तेषां योग्यतानुगुणं जीविका: प्राप्येरन्। येन ते विकसितभारतस्य निर्माणे स्वीयां भूमिकां पालयेयु:। अस्मिन् अवसरे

प्रधानमन्त्रिणा 'विकसित-भारत-योजनाया: अपि प्रवर्तनं कृतम्, यस्याः अन्तर्गतं सार्ध-त्रि-कोटि-मितेभ्य: युवकेभ्य: जीविकोपपादनस्य लक्ष्यं स्थापितम् अस्ति। शृण्वन्तु तावत् ....

एषा योजना देशस्य युवकेभ्य: नूतनां दिशां दर्शयिष्यति। "नेशनल-करियर-सर्विस" संकाशा: डिजिटल पोर्टल इति माध्यमा: युव-जनेभ्यः जीविकाप्रदाने महत्वपूर्णां भूमिकां निर्वहन्ति। आगामिषु वर्षेषु वयं सप्त कोटितोऽप्यधिकानां जीविकावसरणां सृजनस्य लक्ष्यं निधाय अग्रे वर्धामहे।

**प्रधानमन्त्रिण: बिहार-जनसभा –**

बिहारे अद्य एन.डी.ए. संयुतेः, महासंयुतेः च दलानां वरिष्ठ-नेतार: राज्य-विधानसभा-निर्वाचनानां प्रथमचरणस्य प्रचारे व्यस्ता: वर्तन्ते। प्रधानमन्त्री नरेन्द्र मोदी अद्य समस्तीपुरे एन.डी.ए. संयुतेः निर्वाचनाभियानस्य प्रारम्भम् अकरोत्। असौ समाजवादी नेतु: जननायकस्य कर्पूरी ठाकुर-वर्यस्य रिक्थम् उल्लेखयन् प्रोक्तवान् यत् बिहारे विकासः, जीविका, सामाजिक-न्यायश्च जवीयस्या गत्या अग्रे नेष्यन्ते। एतां जनसभां मुख्यमन्त्री नीतीश-कुमारः, केन्द्रीय-मन्त्री जीतन-राम-मांझी चापि सम्बोधितवन्तौ। प्रधानमन्त्री बेगूसराय-मध्ये एकामपरामपि सभां सम्बोधयिष्यति। तत्रैव गृहमन्त्री अमित-शाह: अद्य सीवान-जनपदे, बक्सर-जनपदे च नैर्वाचनिक-जनसभा: करिष्यति, अथ च कृषिमन्त्री शिवराजसिंह-चौहान: गोपालगंजे एन.डी.ए. संयुतेः जनसभां सम्बोधयिष्यति। अपरत्र च, महासंयुतेः मुख्यमन्त्रि-पदस्य प्रत्याशी तेजस्वी-प्रसाद-यादव: पटनायां पत्रकारैः सह प्रावोचत् यत् संविदा-कर्मकरा: स्थायीरूपेण नियोक्ष्यन्ते, राज्ये जीविका-हीनताया: समस्या-समाधानार्थं सुदृढ-पदक्षेपाश्च उत्थापयिष्यन्ते।

**विराम**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

**निर्मला-जीएसटी:**

वित्तमंत्री निर्मलासीतारामन्-वर्या प्रावोचत् यत् जी.एस.टी इति वस्तुसेवाकरस्य परिष्कृत-कराधान-प्रणाली इतोऽपि समुचिता, न्यायसंगता, विकासोन्मुखी च करिष्यते । सा अकथयत् यत् सर्वकारः करदातृणां जीवनं सरलीकर्तुं प्रतिबद्धः अस्ति । अद्य गाजियाबादे नूतनस्य सीजीएसटी-भवनस्य उद्घाटनं कुर्वन्ती मंत्रिवर्या प्रोक्तवती यत् अग्रिम-मासस्य प्रथमदिनाङ्कात् समारभ्य एका सरलीकृता जीएसटी-पंजीकरण-योजना समारप्स्यते । सा अकथयत् यत् येषाम् आवेदकानां मासिक-कर-देय-राशिः पञ्चाशत्-सहस्राधिक-द्वि-लक्षरूप्यकेभ्यः न्यूना अस्ति तेभ्यः त्रयाणामेव कार्यदिवसानामभ्यन्तरे स्वचालित-पंजीकरण-सौविध्यं प्रदास्यते । सा अकथयत् यत् अनेन परिष्कारेण न्यूनातिन्यूनाः षण्णवति-प्रतिशतं नवीनाः आवेदकाः लाभान्विताः भविष्यन्ति ।

**कर्नूल-बस्-दुर्घटना**

आन्ध्रप्रदेशे, हैदराबाद्-नगरात् बेङ्लुरु-नगरं प्रति गच्छतः बसयानस्य मार्गे घटितायां दुर्घटनायां नवदशयात्रिणः, एकः बाईक इति द्विचक्रिका-चालकः च मृताः सन्ति, नैके च व्रणिताः सूच्यन्ते । कल्लूर-मण्डलस्य चिन्ना-तेकुरु-ग्रामं निकषा एषा दुर्घटना अभवत् । प्रातः दुर्घटनास्थलस्य निरीक्षणं कुर्वता जनपदाधिकारिणा डॉ. ए. सिरी इत्यनेन सूचितं यत् व्रणिताः द्वादश-यात्रिणः उपचारार्थं चिकित्सालयं नीताः, अन्येषां पीडितानां च अभिज्ञानं प्रचलति । राष्ट्रपतिः द्रौपदी-मुर्मूवर्या, उपराष्ट्रपतिः सी.पी. राधाकृष्णन् , प्रधानमंत्री नरेंद्रमोदी च दुर्घटनायां जातायां जनहानौ स्वकीयं दुःखं प्रकटितवन्तः । प्रधानमंत्रिणा प्रधानमंत्री-राष्ट्रीय-राहत-कोषतः मृतकानां परिजनेभ्यः द्विलक्ष-रूप्यकाणि, व्रणितेभ्यः च पञ्चाशत्-सहस्र-रूप्यकाणि अनुग्रह-राशि-रूपेण दातुं घोषणा कृता । आंध्र-प्रदेशस्य मुख्यमंत्री एन. चंद्रबाबू-नायडू अस्यां घटनायां गभीरं शोकं प्रकटितवान् सहैव व्रणितेभ्यः यथासम्भवं साहाय्यं प्रदातुं सम्बद्धेभ्यः अधिकारिभ्यः दिङ्निर्देशान् अपि प्रायच्छत् । दुर्घटनायाः वास्तविकं कारणं अतोऽपि निरीक्ष्यते अन्विष्यते च ।

**राष्ट्रपतिः द्रौपदी मुर्मू – महिलाभूमिकायां बलम्।**

राष्ट्रपतिः द्रौपदी मुर्मू-वर्या प्रावोचद् यत् सप्त-चत्वारिंशदुत्तर-द्वि-सहस्र-तम- वर्षं यावत् विकसित-भारतस्य लक्ष्यम् अवाप्तुं महिलानां सक्रिय-सहभागिता नितान्तमेव आवश्यकी वर्तते । असौ अद्य केरलस्य एर्नाकुलम स्थिते सेंट टेरेसा महाविद्यालयस्य शताब्दी समारोहे अभिभाषते स्म। राष्ट्रपतिः उदैरयत् यत् यदा समाजस्य नेतृत्वं महिलाः कुर्वन्ति तदा समाजः अधिकः मानवीयः प्रभावशाली च भवति। अमुना एतदपि प्रोक्तं यत् देशस्य जनसंख्यां सशक्त-शक्तित्वेन परिवर्तितुं महिलानां योगदानम् अनिवार्यमस्ति। राष्ट्रपतिना केरलस्य ताः महिलाः स्मृताः याभी राष्ट्र-निर्माणे सामाजिकेषु आर्थिकेषु च परिष्कारेषु उल्लेखनीयं योगदानम् आचरितम्।

**विदेश मंत्री डॉ. एस. जयशंकरः –संयुक्तराष्ट्रम्**

विदेशमन्त्री डॉ. एस. जयशंकरः उक्तवान् यत् बहुपक्षवादस्य सशक्त-रूपेण प्रवर्तनं, संयुक्तराष्ट्र-मञ्चस्य च समर्थनं विश्वशान्त्यै विश्व-विकासाय च आवश्यकमस्ति। असौ संयुक्त-राष्ट्रस्य अशीति-तम्याः वर्षग्रन्थेः अवसरे नव-दिल्ल्यां स्मारक-प्रैष-मुद्राङ्कनं प्रख्यापितवान्। डॉ. जयशंकरः प्रत्यपादयत् यत् भारतं सर्वदा शान्ति-सुरक्षा-प्रगतीनाम् आदर्शानां कृते प्रतिबद्धम् वर्तते। अमुना चिन्ता प्रकाशिता यत् अद्य संयुक्तराष्ट्र-मञ्चस्य चर्चाः अत्यधिकाः राजनीतिपूर्णाः विभाजिताश्च सन्ति। सहैव परिष्कार-प्रक्रियायाः जटिलता, वित्तीय-संकटञ्च अस्य प्रभावं निर्बलीकरोति। असौ उक्तवान् यत् आतंकवादे संयुक्तराष्ट्र-मञ्चस्य निष्क्रियता तस्य विश्वसनीयतायाम् एव प्रश्नचिह्नम् उत्थापयति। असौ एतदपि प्रत्यपादयात् यत् यदा सुरक्षा परिषदः सदस्यः स्वयं तस्य सङ्घटनस्य रक्षां कुरुते तदा एतदाचरणं बहुपक्षवादस्य आत्मनि अपि प्रश्नः उत्थापयति।

**जेपीनड्डवर्यस्य आह्वानम् – पोलियो मुक्त भारतम्**

विश्व-पोलियो-दिवसस्य अवसरे स्वास्थ्य-परिवार-कल्याण-मन्त्री जे.पी. नड्ड-वर्यः भारतस्य पोलियो उन्मूलन-यात्राम् असाधारणीं प्रत्यपादयत्। अमुना प्रोक्तं यत् भारतस्य एषा सफलता समर्पित-स्वास्थ्य-कर्मकराणां जन-सहभागितायाश्च परिणामः अस्ति, यैः एतद् सुनिश्चितीकृतं यत् कश्चिदपि बालकः पोलियो सूच्यौषधीकरणात् वञ्चितः न स्यात् । नड्ड-वर्येण सोशल मीडिया इति सामाजिक-सञ्जाले व्यलेखि यदेषा राष्ट्रिया उपलब्धिः समेषां सामूहिक-प्रयासैः समुपलब्धा अस्ति। अत्रावसरे अनेन नागरिकाणाम् आह्वानं कृतं यत् यथासमयं बालानां सूच्यौषधीकरण-पूर्वकं स्वस्थ-पोलियो-मुक्त-भारतस्य लक्ष्यं यथावस्थमेव प्रवर्तताम्।

**भारत-कबड्डी-स्वर्णपदकम्**

बहरीन-देशे आयोजितासु एशिया-युव-क्रीडासु , अन्तर-अष्टादश-वर्षीयाणां कबड्डी-स्पर्धायां भारतेन दलद्वये-पि स्वर्ण-पदकं समर्ज्य नैजं प्रभुत्वं स्थापितम् । कन्यकानां दलेन अन्तिमे चक्रे ईरानदलं एकविंशति-अङ्कान् विरुध्य पञ्चसप्तति-अङ्कैः पराभूतम् । अपरत्र च युवकानां दलेन आपीडपूर्णे अन्त्यचक्रे ईरानदलं द्वा-त्रिंशदङ्कं विरुध्य पञ्च-त्रिंशदङ्कैः विजित्य पदकम् अधिगतम् । अनेन विजयेन साकं पदक-तालिकायां भारतस्य स्थितिः उच्चकैः जाता ।

।। इति वार्ताः ।।